୭. କାର୍ଡବୋର୍ଡରେ ସଂଖ୍ୟାଗୁଡିକୁ ବିବିଧସ୍ଥାନରେ ଲେଖି ସଂଖ୍ୟା ଚୟନ ପାଇଁ ପିଲାମାନଙ୍କୁ ଆହ୍ୱାନ କରି ଖେଳାଇ ପାରିବେ । ଯଥା – ଶିକ୍ଷକ କହିବେ 'ଏକାଦଶ' ଦୁଇଜଣ ଛାତ୍ର ଏକାଠି ଆସିବେ । ଯିଏ ପ୍ରଥମେ '୧୧' ସଂଖ୍ୟାକୁ ଚିହ୍ନାଇବେ ସେ ବିଜୟୀ ହେବ ।

ଏହିପରି ବିଭିନ୍ନ ଉପାୟରେ ସଂଖ୍ୟା ଅଭ୍ୟାସ କରାଇବେ ।

# एकादशः पाठः

# पूरणवाचकशब्दाः ପୂରଣବାଚକଶବ୍ଦ

BSVL6S






| | | | |
|---|---|---|---|
| | | | चतुर्थः |



| | | | | |
|---|---|---|---|---|
| | | | | पञ्चमः |



षष्ठ :



सप्तम :



अष्टम :



नवम :



दशम :

**ଶିକ୍ଷକଙ୍କ ପ୍ରତି –** ପୁଅ ପିଲାଙ୍କୁ ଦଶଜଣ ଧାଡି କରି ଆଗରେ ଠିଆ କରନ୍ତୁ । ଅଭିନୟ ସହିତ ପ୍ରଥମରୁ ଦ୍ୱିତୀୟ.... କ୍ରମରେ ଦଶମ ପର୍ଯ୍ୟନ୍ତ ଗଣନ୍ତୁ । ପରେ ଜଣେ ଜଣେ ପିଲାଙ୍କୁ ସେହିପରି କହିବାକୁ କୁହନ୍ତୁ ।

**ତୁମପାଇଁକାମ–** ଯେକୌଣସି ପାଞ୍ଚପ୍ରକାରର ଚିତ୍ର ସଂଗ୍ରହ କରି କ୍ରମରେ ଖାତାରେ ଲଗାଇ ପୂରଣ ବାଚକ ସଂଖ୍ୟା ଲେଖ ।

# अभ्यासः (ଅଭ୍ୟାସ)

## १) पठतु स्मरतु (ପଢ଼ ମନେରଖ)

क) प्रथम : बालकः ।
ख) द्वितीय : पुत्रः ।
ग) तृतीयः छात्रः ।
घ) चतुर्थः चालकः ।
ङ) पञ्चमः शुकः ।
च) षष्ठः मृगः ।
ज) सप्तमः सिंहः ।
झ) अष्टमः विडालः ।
ञ) नवमः सर्पः ।
ट) दशमः अजः ।

## २) पश्यतु वदतु (ଦେଖ କୁହ)

प्रथमः -------- षष्ठः ---------
द्वितीयः ------- सप्तमः--------
तृतीयः------- अष्टमः--------
चतुर्थः -------- नवमः ---------
पञ्चमः -------- दशमः ---------




(ମୟୂରଃ, ବୃକ୍ଷଃ, ସର୍ପଃ, ବାନରଃ, ବିଡାଳଃ, ଘଟଃ, ଗଜଃ, ମୂଷିକଃ, କୁକ୍କୁଟଃ ବକଃ)

# गुणवाचकशब्दा: ଗୁଣବାଚକଶବ୍ଦ

## द्वादश: पाठ:

BT5H8F

### पुंलिङ्ग:

| | | |
|---|---|---|
| सरल: | नम्र: | धीर: |
| शान्त: | भद्र: | चपल: |

### स्त्रीलिङ्ग:

| | | |
|---|---|---|
| सरला | नम्रा | धीरा |
| शान्ता | भद्रा | चपला |

### नपुंसकलिङ्ग:

| | | |
|---|---|---|
| सुन्दरम् | कठिनम् | क्षुद्रम् |
| विशालम् | भद्रम् | पक्वम् |

**पठतु स्मरतु:- (ପଢ଼ ଓ ମନେରଖ)**

| | | |
|---|---|---|
| सरल: बालक: । | सरला बालिका । | सुन्दरं पुष्पम् । |
| शान्त: छात्र: । | शान्ता छात्रा । | विशालं भवनम् । |
| धीर: पुत्र: । | धीरा कन्या । | कठिनं पाषाणम् । |
| भद्र: जन: । | भद्रा महिला । | भद्रं मित्रम् । |
| चपल: पाचक: । | चपला पाचिका । | क्षुद्रं पुस्तकम् । |
| नम्र: कृषक: । | नम्रा बाला । | पक्वं फलम् । |

**ଶବ୍ଦାର୍ଥ** - ଚ଼ପଳଃ = ଚତୁର, ପକ୍ୱମ୍ = ପାଚ଼ିଲା, ପାଚ଼କଃ - ରୋଷେଇଆ

# सर्वनामप्रयोग: ସର୍ବନାମପ୍ରୟୋଗ

## त्रयोदश : पाठ:

उच्चै: पठतु, लिखतु च (ବଡ ପାଟିରେ ପଢ ଓ ଲେଖ)

**एष:**

BTEDA3

**एते**



एष: गज:



एते गजा:

पठतु - वदतु

| | | |
|---|---|---|
| एष : अश्व: । | → | एते अश्वा: । |
| एष: वृक्ष: । | → | एते वृक्षा: । |
| एष: करदीप: । | → | एते करदीपा: । |

**अहम्**

**वयम्**



अहं बालक:



वयं बालका:

पठतु - वदतु

| | | |
|---|---|---|
| अहं छात्र: । | → | वयं छात्रा: । |
| अहं वैद्य: । | → | वयं वैद्या: । |
| अहं शिक्षक: । | → | वयं शिक्षका: । |

ଶବ୍ଦାର୍ଥ = ବୈଦ୍ୟ = ଡାକ୍ତର, ଏଷଃ = ଇଏ/ଏହା, ଏତେ = ଏମାନେ / ଗୁଡ଼ିକ
ଅହମ୍ = ମୁଁ, ବୟମ୍ = ଆମ୍ଭେମାନେ, କରଦୀପଃ - ଟର୍ଚ୍ଚ୍

## मम

एष: मम हस्त:



## अस्माकम्

भारतम् अस्माकं राष्ट्रम्



पठतु - वदतु
ପଢ - କହ

| | |
|---|---|
| मम पुत्र: । | अस्माकं ग्राम: । |
| मम जनक: । | अस्माकं विद्यालय: । |
| मम पुस्तकम् । | अस्माकं शिक्षक: । |

## त्वम्



त्वं बालक: ।

## यूयम्



यूयं बालका: ।

पठतु - वदतु
ପଢ - କହ

| | |
|---|---|
| त्वं शिक्षक: । | यूयं शिक्षका:। |
| त्वं कृषक:। | यूयं कृषका:। |
| त्वम् आपणिक:। | यूयम् आपणिका:। |

ଶବ୍ଦାର୍ଥ - ମମ = ମୋର, ଅସ୍ମାକମ୍ = ଆମ୍ଭମାନଙ୍କର, ଜନକଃ = ପିତା / ବାପା
ତ୍ୱଂ = ତୁମେ, ଯୂୟଂ = ତୁମ୍ଭେମାନେ, ଆପଣିକଃ = ଦୋକାନୀ

तव

युष्माकम्






तव पुस्तकम्

युष्माकं विद्यालय:

पठतु - वदतु
ପଢ - କହ

| | |
|---|---|
| तव शरीरम् । | युष्माकं गृहम्। |
| तव वस्त्रम्। | युष्माकं ग्राम:। |
| तव उपनेत्रम्। | युष्माकं नगरम्। |

**ଶିକ୍ଷକଙ୍କ ପ୍ରତି:-**

ବ୍ୟଞ୍ଜନବର୍ଣ୍ଣ ପରେ ରହିଲେ ପୂର୍ବବର୍ତ୍ତୀ 'ମ୍'କାର ଅନୁସ୍ୱାରରେ ପରିଣତ ହୋଇଯାଏ। ବାକ୍ୟଶେଷରେ କେବଳ 'ମ୍'କାର ବ୍ୟବହୃତ ହୁଏ । ସ୍ୱରବର୍ଣ୍ଣ ପରେ ରହିଲେ ପୂର୍ବବର୍ତ୍ତୀ 'ମ୍' ଅପରିବର୍ତ୍ତିତ ରହେ। ଏକଥା ଶିକ୍ଷକ ବନ୍ଧୁ ଯଥାଯଥ ଉଦାହରଣ ସହ ବୁଝାଇଦେବେ। ଯଥା:-

अहम् छात्र: । अहं छात्र: ।

अस्माकम् गृहम् । अस्माकं गृहम् ।

अस्माकम् आसनम् । अहम् अध्यापक:।

ଶବ୍ଦାର୍ଥ - ତବ = ତୁମର, ଯୁଷ୍ମାକମ୍ = ତୁମ୍ଭମାନଙ୍କର

# अभ्यास: (ଅଭ୍ୟାସ)

## १) रिक्तस्थानं पूरयतु (ଖାଲି ସ୍ଥାନ ପୂରଣ କର)

क)...........गजः । (एषः/एते)

ख).......... वृक्षाः । (एषः/एते)

ग) .......... छात्रः । (अहं / वयं)

घ) .......... शिक्षकाः । (वयं/अहं)

ङ)........... कृषकः । (त्वम्/यूम्)

च)........... आपणिकाः । (यूयम् / त्वम्)

## २) मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

क) मम गृहम्। ______________________

ख) मम हस्तः। ______________________

ग) अहं बालिका। ______________________

घ) अस्माकं राष्ट्रम्। ______________________

ङ) तव उपनेत्रम्। ______________________

## ३) पठतु लिखतु - (ପଢ଼ ଓ ଲେଖ)

| | |
|---|---|
| यथा - एषः अजः । | एते अजाः। |
| तथा- क) एषः छात्रः। | एते ........... । |
| ख) एषः विहगः। | .......... विहगाः । |
| ग) अहं सैनिकः। | वयं ........... । |
| घ) त्वं पथिकः। | ........... पथिकाः । |
| ङ) अहं भारतीयः। | वयं ........... । |

## स:

## ते



स: वानर: ।

ते वानरा: ।







स: अज: ।

ते अजा: ।



## सा

## ता:



सा माला ।

ता: माला: ।







सा बालिका ।

ता: बालिका: ।



ଶବ୍ଦାର୍ଥ : ସଃ = ସେ, ତେ = ସେମାନେ (ପୁଂ)
ସା = ସେ, ତାଃ = ସେମାନେ (ସ୍ତ୍ରୀ)

# पठतु स्मरतु (ପଢ ମନେରଖ)

| सः | ते |
|---|---|
| स : अश्वः। | ते अश्वाः। |
| सः गजः। | ते गजाः। |
| सः मयूरः। | ते मयूराः। |
| सः पर्वतः। | ते पर्वताः। |
| सः मूषकः। | ते मूषकाः। |
| सः काकः। | ते काकाः। |
| सः वृक्षः। | ते वृक्षाः। |

| सा | ताः |
|---|---|
| सा बालिका । | ताः बालिकाः । |
| सा पाचिका । | ताः पाचिकाः । |
| सा सेविका । | ताः सेविकाः । |
| सा मक्षिका । | ताः मक्षिकाः । |
| सा लता । | ताः लताः । |
| सा पताका । | ताः पताकाः । |
| सा अम्बा । | ताः अम्बाः । |

ଶବ୍ଦାର୍ଥ : ପାଚିକା = ରୋଷେଇକରୁଥିବା ସ୍ତ୍ରୀଲୋକ, ମକ୍ଷିକା = ମାଛି, ଅମ୍ବା = ମାଆ

## तत्  तानि





तत् उपनेत्रम्



तानि उपनेत्राणि



तत् कङ्कतम्।



तानि कङ्कतानि ।



तत् दूरदर्शनम् ।



तानि दूरदर्शनानि ।

## एषः कः ?  एते के ?





एषः अजः ।





एते अजाः ।

| एषः | पठतु - वदतु | एते |
|---|---|---|
| एषः कृषकः । | ପଢ - କହ | एते कृषकाः । |
| एषः चालकः । | | एते चालकाः । |
| एषः रक्षकः । | | एते रक्षकाः । |

ଶବ୍ଦାର୍ଥ : ତତ୍ = ତାହା, ତାନି = ସେଗୁଡ଼ିକ, କଃ = କିଏ, କେ = କେଉଁମାନେ।

## एषा का ?



एषा बालिका ।

पठतु - वदतु
ପଢ - କହ

- एषा महिला ।
- एषा पताका ।
- एषा वैद्या ।

## एताः काः ?



एताः बालिकाः ।

- एताः महिलाः ।
- एताः पताकाः ।
- एताः वैद्याः ।

## एतत् किम् ?



एतत् फलम् ।

पठतु - वदतु
ପଢ - କହ

- एतत् करवस्त्रम् ।
- एतत् वाद्यम् ।
- एतत् गृहम् ।

## एतानि कानि ?



एतानि फलानि ।

- एतानि करवस्त्राणि ।
- एतानि वाद्यानि ।
- एतानि गृहाणि ।

ଶବ୍ଦାର୍ଥ : କା = କିଏ (ସ୍ତ୍ରୀ), କାଃ = କେଉଁମାନେ (ସ୍ତ୍ରୀ), କିମ୍ = କ'ଣ, କାନି = କେଉଁଗୁଡିକ
କରବସ୍ତ୍ରମ୍ = ରୁମାଲ, ଏଷା-ଇଏ (ସ୍ତ୍ରୀ) ଏତାଃ - ଏମାନେ (ସ୍ତ୍ରୀ),
ଏତତ୍ କିମ୍ = ଏହା କ'ଣ, ଏତାନି କାନି = ଏଗୁଡ଼ିକ କ'ଣ

# अभ्यासः (ଅଭ୍ୟାସ)

१) **शून्यस्थाने उचितं पदं लिखतु** (ଶୂନ୍ୟସ୍ଥାନରେ ଠିକ୍ ପଦ ଲେଖ)

(एषः, तत्, सः, सा, एतत्)

क) ............. माधवः ।

ख) ............ युतकम् ।

ग) ........... सुजाता ।

घ) .......... देवयानी ।

ङ) .......... शिक्षकः ।

च) ........... कर्गजम् ।

२) **मातृभाषया अर्थं लिखतु** (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

क) ...एषः...... गोपालः

ख) ...एतत्.... छत्रम् ।

ग) ....सा...... उमा ।

घ) ....सा.....अध्यापिका ।

ङ) ...तत्... मूलम् ।

च) ....सः.... सदानन्दः ।

ଶବ୍ଦାର୍ଥ : ଯୁତକମ୍ - ଜାମା, କର୍ଗଜମ୍ - କାଗଜ

## उचितं पदं निरूपयतु (ଠିକ୍ ପଦ ବାଛ)

३) अहं / वयम् / मम / अस्माकम्

क) .............. विपिनः ।
ख)............. विद्यालयः ।
ग) ............ छात्राः ।
घ) ............ बालकाः ।
ङ) ........... हस्तः ।

४) त्वम् / यूयम्/तव / युष्माकम्

क)............ सैनिकः ।
ख)............ वीराः ।
ग) ............ भवनम् ।
घ) ............ सेवकाः ।
ङ)............ आपणिकः ।

५) कः/के/ का, काः, किम् / कानि

क)............ रमेशः ?
ख)...........पुस्तकम् ?
ग) ............ पत्राणि ?
घ) ............ शिक्षिका ?
ङ)............ रक्षकाः
च)............. महिलाः

ତୁମପାଇଁକାମ : ୫ଜଣ ସାଙ୍ଗଙ୍କର ପରିଚୟ ଲେଖ।

ଯଥା - ଏଷଃ ରମେଶଃ ଏଷା ମାୟା।

# परिचयः ପରିଚୟ

BTN9BQ

## चतुर्दशः पाठः




ଶବ୍ଦାର୍ଥ : ଭବାନ୍ = ଆପଣ (ପୁଂ), ଭବତୀ = ଆପଣ (ସ୍ତ୍ରୀ)



अहं कृषकः ।

अहं



वैद्यः



सैनिकः



मापकः

अहं



गायिका



सेविका



शिक्षिका

# त्वं

छात्रः



छात्रा



शिक्षकः




शिक्षिका



सेवकः



सेविका



नर्तकः



गायकः



**भवान्**

नाविकः



वादकः



चालिका



गायिका



**भवती**

चिकित्सिका



पाठिका



# पञ्चदश: पाठ:

BTX5DD

# शरीरस्य अङ्गानि ଶରୀରର ଅଙ୍ଗ



# अभ्यासः (ଅଭ୍ୟାସ)

१) अधो लिखित कोष्ठकं पश्यतु शरीरस्य पञ्च अङ्गानि लिखतु
(କୋଷ୍ଠକ ଦେଖି ଶରୀରର ପାଞ୍ଚଟି ଅଙ୍ଗ ଲେଖ।)

| | | |
|---|---|---|
| ना | ङ्ग | शाः |
| अ | त्र | वा |
| के | सि | म् |
| ने | * | लिः |
| ग्री | * | का |

क) ____________

ख) ____________

ग) ____________

घ) ____________

ङ) ____________

२. चित्रं पश्यतु नाम वदतु।
(ଚିତ୍ର ଦେଖି ନାମ କୁହ।



୩. ତୁମପାଇଁକାମ - ପୂର୍ଣ୍ଣାଙ୍ଗ ମଣିଷ ଚିତ୍ର ସଂଗ୍ରହ କରି ଖାତାରେ ଲଗାଇ ୫ଟି ଅଙ୍ଗର ନାମ ସଂସ୍କୃତରେ ଲେଖ।

# क्रियापरिचय: କ୍ରିୟା ପରିଚୟ

## पश्यतु - वदतु ଦେଖ - କୁହ



बालक: पठति ।



बालिका लिखति ।



बालक: गच्छति ।



बालिका आगच्छति ।



जितु: पिबति ।



वानर: खादति ।



शिशु: क्रन्दति ।



बाल: हसति ।



सिंहः गर्जति ।



फलं पतति ।



नदी वहति ।



अश्वः धावति ।



रेलयानं चलति ।



जनः उपविशति ।



बाला नृत्यति



माधवः खेलति ।



बालः पश्यति।



गीता वदति।

# अभ्यासः (ଅଭ୍ୟାସ)

## पश्यतु-लिखतु (ଦେଖ - ଲେଖ)

१)



बालकः पठति ।



........... खेलति ।



........... खादति ।



........... चलति ।



........... नृत्यति



........... गर्जति।

२)



........... लिखति ।



बालः ...........।



नदी ........... ।



अश्वः ........... ।



फलं ...........।



जितुः ...........।

३) पठितपाठानुसारं पञ्च वाक्यानि लिखतु। (ପଠିତ ପାଠ ଅନୁସାରେ ୫ ଟି ବାକ୍ୟ ଲେଖ)

यथा- जनः उपविशति ।

तथा- क) ........ .......... ।

ख) ........ .......... ।

ग) ........ .......... ।

घ) ........ .......... ।

ङ) ........ .......... ।

# सप्तदशः पाठः

## वचनपरिचयः

## ବଚନ ପରିଚୟ



बालकः



बालकौ



बालकाः



हंसः



हंसौ



हंसाः



बालिका



बालिके



बालिकाः



लता



लते



लताः



फलम्



फले



फलानि



पत्रम्



पत्रे



पत्राणि













त्वं सैनिकः



युवां सैनिकौ



यूयं सैनिकाः

# अभ्यासः (અભ્યાસ)

## पठतु-वदतु (પઢ - કૂહ)

| | | |
|---|---|---|
| बालकः | बालकौ | बालकाः |
| शिक्षकः | ............. | ............. |
| छात्रः | ............. | ............. |

| | | |
|---|---|---|
| बालिका | बालिके | बालिकाः |
| शिक्षिका | ............. | ............. |
| छात्रा | ............. | ............. |
| लता | ............. | ............. |

| | | |
|---|---|---|
| फलम् | फले | फलानि |
| मूलम् | ............. | ............. |
| पत्रम् | ............. | पत्राणि |
| पुष्पम् | ............. | पुष्पाणि |

# वर्त्तमानकाल: ବର୍ତ୍ତମାନକାଳଃ

BUPSIB

# अष्टादश: पाठ:



छात्र: पठति ।



छात्रौ पठत: ।



छात्रा: पठन्ति ।



बालक: हसति ।



बालकौ हसत: ।



बालका: हसन्ति ।



गज: चलति ।



गजौ चलत: ।



गजा: चलन्ति।



युवक: खेलति।



युवकौ खेलत: ।



युवका: खेलन्ति ।



शुकः खादति ।



शुकौ खादतः ।



शुकाः खादन्ति ।



बाला पिबति ।



बाले पिबतः ।



बालाः पिबन्ति ।



वृद्धः गच्छति ।



वृद्धौ गच्छतः ।



वृद्धाः गच्छन्ति ।



शिशुः पश्यति ।



शिशू पश्यतः ।



शिशवः पश्यन्ति ।



त्वं सैनिकः ।



त्वं तिष्ठसि ।



त्वं खादसि ।



त्वं गच्छसि ।



त्वं पिबसि ।



त्वं पश्यसि ।



त्वं धावसि ।



त्वं लिखसि ।





युवां सैनिकौ ।





युवां तिष्ठथः ।



युवां खादथः ।



युवां गच्छथः ।



युवां पिबथः ।



युवां पश्यथः ।



युवां धावथः ।



युवां लिखथः ।



यूयं सैनिकाः ।



यूयं तिष्ठथ ।



यूयं खादथ ।



यूयं गच्छथ ।



यूयं पिबथ ।



यूयं पश्यथ ।



यूयं धावथ ।



यूयं लिखथ ।




अहं खेलामि


अहं पठामि


अहं गोपालः
अहं छात्रः


अहं पिबामि


अहं हसामि


अहं धावामि


अहं नृत्यामि


अहं क्रन्दामि


अहं खादामि


आवां बालकौ


आवां हसाव:


आवां खादाव:


आवां पठाव:


आवां नृत्याव:


आवां धावाव:


आवां पिबाव:


आवां खेलाव:


वयं छात्रा:


वयं पठाम:


वयं खादाम:


वयं गच्छाम:













वयं पश्याम: वयं वदाम: वयं तिष्ठाम: एकत्र
वयं हसाम: वयं खेलाम: वयं गच्छाम: सर्वत्र

# अभ्यासः (ଅଭ୍ୟାସ)



बालकः

गच्छति, पठति
हसति, खादति
पिबति, चलति
धावति, पश्यति

बालकौ

गच्छतः, पठतः
हसतः, खादतः
पिबतः, चलतः
धावतः, पश्यतः

बालकाः

गच्छन्ति, पठन्ति
हसन्ति, खादन्ति
पिबन्ति, चलन्ति
धावन्ति, पश्यन्ति

१. पश्यतु लिखतु (ଦେଖ ଲେଖ)

| | बालकः | पठति। | बालकौ | पठतः। | बालकाः | पठन्ति। |
|---|---|---|---|---|---|---|
| क) | ......... | ......... | ......... | ......... | ......... | ......... |
| ख) | ......... | ......... | ......... | ......... | ......... | ......... |
| ग) | ......... | ......... | ......... | ......... | ......... | ......... |
| घ) | ......... | ......... | ......... | ......... | ......... | ......... |
| ङ) | ......... | ......... | ......... | ......... | ......... | ......... |
| च) | ......... | ......... | ......... | ......... | ......... | ......... |



त्वं

गच्छसि, पठसि
हससि, खादसि
पिबसि, चलसि
धावसि, पश्यसि

युवां

गच्छथः, पठथः
हसथः, खादथः
पिबथः, चलथः
धावथः, पश्यथः

यूयं

गच्छथ, पठथ
हसथ, खादथ
पिबथ, चलथ
धावथ, पश्यथ

२. पश्यतु लिखतु (ଦେଖ ଲେଖ)

| | त्वं | पश्यसि। | युवां | पश्यथः। | यूयं | पश्यथ। |
|---|---|---|---|---|---|---|
| क) | ......... | ......... | ......... | ......... | ......... | ......... |
| ख) | ......... | ......... | ......... | ......... | ......... | ......... |
| ग) | ......... | ......... | ......... | ......... | ......... | ......... |
| घ) | ......... | ......... | ......... | ......... | ......... | ......... |
| ङ) | ......... | ......... | ......... | ......... | ......... | ......... |
| च) | ......... | ......... | ......... | ......... | ......... | ......... |



अहं

गच्छामि, पठामि
हसामि, खादामि
पिबामि, चलामि
धावामि, पश्यामि



आवां

गच्छाव:, पठाव:
हसाव:, खादाव:
पिबाव:, चलाव:
धावाव:, पश्याव:



वयं

गच्छाम:, पठाम:
हसाम:, खादाम:
पिबाम:, चलाम:
धावाम:, पश्याम:

पश्यतु लिखतु (ଦେଖ ଲେଖ)

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा : | अहं | चलामि। | आवां | चलाव:। | वयं | चलाम:। |
| तथा : | | | | | | |
| क) | ......... | ......... | ......... | ......... | ......... | ......... |
| ख) | ......... | ......... | ......... | ......... | ......... | ......... |
| ग) | ......... | ......... | ......... | ......... | ......... | ......... |
| घ) | ......... | ......... | ......... | ......... | ......... | ......... |
| ङ) | ......... | ......... | ......... | ......... | ......... | ......... |
| च) | ......... | ......... | ......... | ......... | ......... | ......... |

**ମୌଖିକ :** ଏହିଭଳି ସଂସ୍କୃତରେ ୫ଟି ବାକ୍ୟ ନିଜସାଙ୍ଗଙ୍କୁ କୁହ।

# संभाषणम् ସମ୍ଭାଷଣ

## नवदश: पाठ:



भवान् क: ?

अहं छात्र:





भवान् किं करोति ?

अहं पठामि ।





अहं पिबामि

अहं हसामि





भवती का ?

अहं छात्रा ।





भवती किं करोति ?

अहं खेलामि ।





अहं धावामि

अहं गायामि ।



हसामि खेलामि पठामि नित्यम्
लिखामि वदामि पश्यामि सत्यम्



# अभ्यास: (અભ્યાસ)

| भवान् कः ? | भवती का ? |
|---|---|
| अहं<br>पुरुषः, बालकः , कृषकः,<br>वैद्यः, आपणिकः, शिक्षकः,<br>जनकः, चालकः, छात्रः, | अहं<br>बालिका , सेविका, नर्त्तकी,<br>महिला, अध्यापिका, भारतीया,<br>देशसेविका, छात्रा, शिक्षिका |

| | |
|---|---|
| १. ..........अहं कृषकः.......... । | १. ..........अहं बालिका.......... । |
| २. .......................... । | २. .......................... । |
| ३. .......................... । | ३. .......................... । |
| ४. .......................... । | ४. .......................... । |
| ५. .......................... । | ५. .......................... । |

१. अहं शिक्षक : ।
भवान् ........ ?

२. अहम् अनसूया ।
भवती ........?

३. अहं प्रभा ।
....... ..........?

४. अहं नृसिंहः ।
....... ........?

५. अहं गायिका ।
....... ...........?

६. अहं गृहिणी ।
...... ..........?



मेघः आयाति पवनः वाति
पिकः कूजति पथिकः याति

# भविष्यत् काल: ଭବିଷ୍ୟତ୍ କାଳ

## साग्रहं पठतु (ଆଗ୍ରହର ସହ ପଢ)






एष: सैनिक: भविष्यति ।











## साग्रहं पठतु




पिता चिन्तयति

## पठतु ପଢ଼

पुत्रः —
- पाठं पठिष्यति।
- देवालयं गमिष्यति।
- फलं खादिष्यति।
- देशसेवां करिष्यति।
- कवितां लेखिष्यति।

## साग्रहं पठतु (ଆଗ୍ରହରେ ପଢ଼)

| वर्तमानकाले | भविष्यत्काले |
|---|---|
| गच्छति | गमिष्यति |
| वदति | वदिष्यति |
| खेलति | खेलिष्यति |
| लिखति | लेखिष्यति |
| हसति | हसिष्यति |
| पठति | पठिष्यति |
| पिबति | पास्यति |
| ददाति | दास्यति |
| पश्यति | द्रक्ष्यति |
| करोति | करिष्यति |

## दीपावलिः-

सीता - गीते ! श्वः दीपावलिः । भवती किं करिष्यति ?

गीता - अहं प्रातः पूजां करिष्यामि । देवालयं गमिष्यामि ।



सीता - मम अग्रजः आगमिष्यति । लड्डुकम् आनेष्यति ।

गीता - अहं नूनं लड्डुकं खादिष्यामि ।



सीता - प्रान्तरे सर्वे क्रीडिष्यन्ति ।

उत्सवदिनम् उत्साहदिनम् ।

# अभ्यास: (ଅଭ୍ୟାସ)

## १. भविष्यत्काले परिवर्तनं करोतु :- (ଭବିଷ୍ୟତ୍ କାଳରେ ପରିବର୍ତ୍ତନ କର।)

क माधव: पठति ।
माधव: पठिष्यति ।

ख मिता हसति ।
.........................

ग गोपाल: कटकं गच्छति ।
.........................

घ नलिनी फलं खादति ।
.........................

ङ विद्या कार्यं करोति ।
.........................

च. कवि: कवितां लिखति।
.........................

## २. उदाहरणानुसारं वाक्यं रचयतु । (ଉଦାହରଣ ଅନୁସାରେ ବାକ୍ୟ ଲେଖ)

| अहम् | वयम् | | अहं पठामि। | वयं पठाम:। |
|---|---|---|---|---|
| खादामि | खादाम: | १. | ..... ...... | ..... ...... |
| हसामि | हसाम: | २. | ..... ...... | ..... ...... |
| तिष्ठामि | तिष्ठाम: | ३. | ..... ...... | ..... ...... |
| गायामि | गायाम: | ४. | ..... ...... | ..... ...... |
| लिखामि | लिखाम: | ५. | ..... ...... | ..... ...... |

## ३. उदाहरणानुसारं वाक्यं रचयतु । (ଉଦାହରଣ ଅନୁସାରେ ବାକ୍ୟ ଲେଖ)

| अहम् | वयम् | | अहं पठिष्यामि। | वयं पठिष्याम:। |
|---|---|---|---|---|
| खादिष्यामि | खादिष्याम: | १. | ..... ...... | ..... ...... |
| हसिष्यामि | हसिष्याम: | २. | ..... ...... | ..... ...... |
| स्थास्यामि | स्थास्याम: | ३. | ..... ...... | ..... ...... |
| गास्यामि | गास्याम: | ४. | ..... ...... | ..... ...... |
| लेखिष्यामि | लेखिष्याम: | ५. | ..... ...... | ..... ...... |

## ४. स्तम्भं मेलयतु । (ସ୍ତମ୍ଭ ମେଳନ କର)

| | |
|---|---|
| हसामि | खेलाम: |
| लिखामि | लिखाम: |
| खेलामि | हसाम: |
| तिष्ठामि | तिष्ठाम: |
| गायामि | गायाम: |

## ५.अक्षराणि सज्जीकरोतु । (ଅକ୍ଷରଗୁଡିକୁ ସଜାଇ ଲେଖ)

| | | |
|---|---|---|
| खे मि ला | - | खेलामि |
| मि खा लि | - | |
| स्या मि गा | - | |
| प ष्य ठि ति | - | |
| न्द क्र ति | - | |
| म: ह सा | - | |
| ठा प मि | - | |

## ६. मातृभाषया अर्थं वदतु। (ମାତୃଭାଷାରେ ଅର୍ଥ କୁହ)

| अहम् | वयम् | | अहं पठामि। | वयं पठाम:। |
|---|---|---|---|---|
| खादामि | खादाम: | १. | ..... ...... | ..... ...... |
| हसामि | हसाम: | २. | ..... ...... | ..... ...... |
| तिष्ठामि | तिष्ठाम: | ३. | ..... ...... | ..... ...... |
| गायामि | गायाम: | ४. | ..... ...... | ..... ...... |
| लिखामि | लिखाम: | ५. | ..... ...... | ..... ...... |

| | | | |
|---|---|---|---|
| गमिष्याम: | खादिष्याम: | खेलिष्याम: | एकदा |
| पठिष्याम: | हसिष्याम: | लेखिष्याम: | सर्वदा |



# वासरः ବାର

# एकविंशः पाठः

| |
|---|
| रविवासरः |
| सोमवासरः |
| मङ्गलवासरः |
| बुधवासरः |
| गुरुवासरः |
| शुक्रवासरः |
| शनिवासरः |

BVHFN9

| | | |
|---|---|---|
| अद्य सोमवासरः<br>श्वः मङ्गलवासरः<br>परश्वः बुधवासरः<br>प्रपरश्वः गुरुवासरः | अद्य बुधवासरः<br>ह्यः मङ्गलवासरः<br>परह्यः सोमवासरः<br>प्रपरह्यः रविवासरः<br>श्वः गुरुवासरः<br>परश्वः शुक्रवासरः<br>प्रपरश्वः शनिवासरः | अद्य शुक्रवासरः<br>ह्यः गुरुवासरः<br>परह्यः बुधवासरः<br>प्रपरह्यः मङ्गलवासरः |

अद्य —रविवासरः→ श्वः ⟶ परश्वः ⟶ प्रपरश्वः

प्रपरह्यः ⟵ परह्यः ⟵ ह्यः ⟵ अद्य

**शिक्षकान् प्रति :- ''वासरः'' इति स्थाने 'वारः' इति प्रयोगः अपि करणीयः**
**यथा - रविवारः सोमवारः इत्यादयः।**

ଶବ୍ଦାର୍ଥ - ଅଦ୍ୟ = ଆଜି, ଶ୍ୱଃ = ଆସନ୍ତାକାଲି, ପରଶ୍ୱଃ = ତା ପରଦିନ, ପ୍ରପରଶ୍ୱଃ = ଅପରଦିନ
ହ୍ୟଃ = ଗତକାଲି, ପରହ୍ୟଃ = ତା' ପୂର୍ବଦିନ, ପ୍ରପରହ୍ୟଃ = ତହିଁ ପୂର୍ବଦିନ

# अभ्यासः (અભ્યાસ)

## १. अद्य गुरुवासरः।

क) श्वः..........................वासरः।

ख) परश्वः ...................वासरः।

ग) प्रपरश्वः.................वासरः।




## २. ह्यः रविवासरः।

क) .............. सोमवासरः।

ख) .............. मङ्गलवासरः।

ग) .............. बुधवासरः।

घ) .............. शनिवासरः।

## ३. अद्य शुक्रवासरः।

क) .............. गुरुवासरः

ख) परह्यः .................।

ग) .............. मङ्गलवासरः।

घ) श्वः .......................।

ङ) परश्वः.....................।



# अव्ययप्रयोग: ଅବ୍ୟୟର ପ୍ରୟୋଗ

# द्वाविंश: पाठ:

BVRBPH

एष: कुमार: । कुमार: प्रात: उत्तिष्ठति । तत: दन्तमार्जनं करोति । अनन्तरं योगाभ्यासं करोति । तत: स्नानं करोति । यदा दर्पणं धरति । तदा प्रतिविम्बं पश्यति। प्रसाधनात् परं देवपूजां करोति। अथ पठनगृहं गच्छति। अन्यत्र न भ्रमति। यत्र पठति तत्र लिखति । अत्र पठनसमये कुत्र अपि न गच्छति । स: गृहपाठं लिखति पठति च । प्रतिदिनं वार्त्तापत्रिकां पठति । संस्कृतवार्ताम् अपि शृणोति । स: दिवा भक्तं खादति । सायं प्रार्थनां करोति । नक्तं रोटिकां खादति । अधुना प्रान्तरे खेलति। स: एव बालक: भवति । स: कुत: भयं न करोति। सर्वदा गुरुजनं नमति। एकदा स: देशभक्त: भविष्यति । स: सर्वत्र प्रशंसित: भवति ।

**शब्दार्थ :-** प्रात: -ସକାଳେ, उत्तिष्ठति-ଉଠେ, यदा–ଯେତେବେଳେ, तदा -ସେତେବେଳେ, अन्यत्र -ଅନ୍ୟଆଡେ, यत्र -ଯେଉଁଠାରେ, तत्र -ସେଠାରେ, अत्र -ଏଠାରେ, कुत्र -କେଉଁଠାରେ, अपि–ମଧ୍ୟ, च -ଓ /ଏବଂ, सर्वदा -ସବୁବେଳେ, वार्तापत्रिकाम्–ସମ୍ବାଦପତ୍ର, दिवा - ଦିନରେ, भक्तम्–ଭାତ, सायम्-ସନ୍ଧ୍ୟାରେ, नक्तम्–ରାତିରେ, रोटिकाम्–ରୋଟି, अधुना - ବର୍ତ୍ତମାନ, प्रान्तरे -ପଡିଆରେ, एव - ହିଁ, कुत: - କେଉଁଠାରୁ, एकदा - ଦିନେ, सर्वत्र- ସବୁଠାରେ, अथ- ଏହାପରେ, अनन्तरम्- ଏହାପରେ, प्रतिदिनम्- ସବୁଦିନ। तत: - ତାପରେ, परम् - ପରେ, प्रसाधनात् परम् - ବେଶଭୂଷା (ସଜବାଜ) ପରେ ।

## अभ्यास :- (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) कुमार: .................. उत्तिष्ठति।

ख) ........... योगाभ्यासं करोति ।

ग) प्रसाधनात् परं ..............करोति ।

घ) ..यत्र.... पठति तत्र ........... ।

ङ) स: दिवा .............. खादति ।

(अनन्तरं, भक्तं, लिखति, प्रात :, देवपूजाम्)

## २) स्तम्भं मेलयतु (ସ୍ତମ୍ଭ ମିଳାଅ)

| ‘क’ | ‘ख’ |
|---|---|
| एषः | पठति |
| यत्र | कुमारः |
| संस्कृतवार्त्तां | शृणोति |
| दिवा | लिखति |
| तत्र | खादति |

## ३) वाक्यं रचयतु (ବାକ୍ୟ ତିଆରି କର)

| | | |
|---|---|---|
| | प्रातः | उत्तिष्ठति |
| कुमारः | सायम् | पठति |
| सः | नक्तम् | गच्छति |
| एषः | अधुना | लिखति |
| | एव | |

**ନିଜପାଇଁକାମ :** ଏହି ବିଷୟରୁ ୫ଟି ବାକ୍ୟ ମନେରଖି କୁହ।

# त्रयोविंश : पाठ :

# रक्ष गोमातरम्

रक्ष रक्ष मातरम्
रक्ष गोमातरम्
सा ददाति हितकरं
क्षीरममृतसन्निभम् । (१)






धेनुक्षीरघृतदधि
बालपुष्टिकारकम्
बुद्धिवर्द्धनोचितं
सद्गुणप्रदायकम् (२)

BH17RJ

गोमूत्रगोमये
देहशुद्धिकारके ।
शस्यधान्यवृद्धये
सर्वदोपकारके । (३)



## शब्दार्थः - ଶବ୍ଦାର୍ଥ

**मातरम्**- ମା'କୁ, **अमृतसन्निभम्**- ଅମୃତ ସଦୃଶ, **गोमूत्रगोमये**- ଗାଈମୂତ ଓ ଗୋବର, **धान्यवृद्धये**- ଧାନ ବଢାଇବାପାଇଁ । **सर्वदोपकारके - सर्वदा + उपकारके** - ସବୁବେଳେ ଉପକାରକ

इदं गीतं कण्ठगतं करोतु ।

# अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) रक्ष ——— मातरम्।

ख) सा ——— हितकरम्।

ग) ——— अमृतसन्निभम्।

२. मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

मातरम्, गोमूत्र गोमये , ददाति, सर्वदा, बालः

३. स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭ ମିଳାଅ)

| क | ख |
|---|---|
| रक्ष | हितकरम् |
| ददाति | उपकारके |
| सर्वदा | मातरम् |

# लालनगीतम्

घड घड घड घड गर्जति मेघ :
टरर टरर टर वदति भेक: ।







टिक् टिक् टिक् टिक् नदति घटिका
भण भण भण भण भणति मक्षिका (१)

वहति झरर झर रुचिरनिर्झर :
वहति ससर सर मन्दसमीर : (३)







टप टप टप टप याति घोटक :
नृत्यति थथथै थथै नर्त्तक : (४)

रौति कुक्कुट : कुक् कुक् कुक् कुक्
गच्छति यानं छुक् छुक् छुक् छुक् (५)







मन्दं मन्दं चलति कर्कट :
पश्यति वृक्षात् बालमर्कट : (६)

**ଶବ୍ଦାର୍ଥ:-** **गर्जति** -ଗର୍ଜନ କରୁଛି, **वदति**- କହୁଛି, **भेक**:- ବେଙ୍ଗ, **नदति**- ବାଜୁଛି, **घटिका**- ଘଣ୍ଟା, **भणति**- କହୁଛି, **मक्षिका**- ମାଛି, **रुचिरनिर्झर**:- ସୁନ୍ଦର ଝରଣା, **मन्दसमीर**:- ଧୀର ପବନ, **याति**- ଯାଉଛି, **घोटक**:- ଘୋଡା, **नृत्यति**- ନାଚୁଛି, **रौति**- ବୋବାଉଛି, **कर्कट**:- କଙ୍କଡା, **बालमर्कट**:- ଛୋଟ ମାଙ୍କଡ, **वहति**–**ବହୁଛି** ।

**सस्वरं साभिनयं च गानं करोतु**

# अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) ——— गर्जति।

ख) वदति ——— ।

ग) घटिका ———।

घ) मक्षिका ———।

ङ) ——— चलति।

२. मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

मक्षिका, नृत्यति, याति, भेकः, कर्कटः

३. संस्कृतेन अनुवादं करोतु। (ସଂସ୍କୃତରେ ଅନୁବାଦ କର)

ଗର୍ଜନ କରୁଛି, ଚାଲୁଛି, ଦେଖୁଛି, ଗାଉଛି, ନାଚୁଛି।

४. स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭ ମିଳାଅ)

| क | ख |
|---|---|
| घोटकः | ससर सर |
| समीरः | कुक् कुक् कुक् |
| मक्षिका | घड घड घड |
| मेघः | टप् टप् |
| कुक्कुटः | भण भण भण |

# अहं नमामि

अहं नमामि भारतम्
अहं नमामि मातरम् ।।१ ।।



सत्यं वदामि सर्वदा
गायामि शुभं सर्वदा ।।२ ।।

दानं ददामि सर्वदा
मानं करोमि  सर्वदा ।।३ ।।

गुरुं नमामि  सादरम्।
हरिं  स्मरामि सादरम् ।।४।।



कष्टपर्वते चरामि ।
दु:खसागरे तरामि।।५ ।।

विपत्तिविपिने भ्रमामि।
लोकहितं चिन्तयामि।।६ ।।

ଶବ୍ଦାର୍ଥ:- **शुभम्** -ମଙ୍ଗଳ, **सर्वदा**- ସବୁବେଳେ, **विपत्तिविपिने** - ବିପଦପୂର୍ଣ୍ଣ ବଣରେ, **चिन्तयामि** - ଚିନ୍ତାକରୁଛି, **तरामि**- ପହଁରୁଛି, **चरामि** - ବୁଲୁଛି, **स्मरामि**- ମନେ ପକାଉଛି, **नमामि** - ନମସ୍କାର କରୁଛି । **माने कशेमि** - ସମ୍ମାନ କରେ / ସ୍ୱାଭିମାନ ରକ୍ଷା କରେ।

# अभ्यासः (ଅଭ୍ୟାସ)

१. इमां कवितां सस्वरं गायतु। (ଏହି କବିତାକୁ ସ୍ୱରରେ ଗାନ କର)

२. रिक्तस्थानानि पूरयतु- (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क. दुःखसागरे —।

ख. गुरुं — सादरम्।

ग. — शुभं सर्वदा।

घ. अहं — नमामि।

ङ. — चिन्तयामि।

(भारतम्, नमामि, तरामि, गायामि लोकहितम)

३. एकेन शब्देन उत्तरं लिखत- (ଗୋଟିଏ ଶବ୍ଦରେ ଉତ୍ତର ଲେଖ)

क. अहं कां नमामि ?

ख. सर्वदा किं गायामि ?

ग. अहं कं स्मरामि ?

घ. सर्वदा किं करोमि ?

ङ. सर्वदा किं वदामि ?

(मातरम्, हरिम्, सत्यम्, शुभम्, मानम्)

४. वाक्यानि रचयत- (ବାକ୍ୟ ରଚନା କର)

नमामि

करोमि

गायामि

ददामि

भ्रमामि

वदामि

BHA3T7



# अक्षरगीतम्

क च ट त प क च ट त प



काकः कायति का .........का ...........

ख छ ठ थ फ ख छ ठ थ फ



बकः वदति आ.........आ.........

ग ज ड द ब ग ज ड द ब



व्याघ्रः गर्जति गँ.........गँ..........

घ झ ढ ध भ घ झ ढ़ ध भ



यानं चलति घँ.............घँ.............

अ इ उ ण् अ इ उ ण्



घण्टानादः टिङ्............. टिङ्..........

ञ म ङ ण न ञ म ङ ण न



वृद्धः करोति खँ......... खँ ............. ।

गीतं सस्वरं गायन्तु

# अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) ——— कायति का - - का।

ख) ——— वदति आ - - आ ।

ग) ——— गर्जति गँ - - गँ।

घ) ——— चलति घँ - - घँ।

ङ) ——— करोति खँ - - खँ।

२. मातृभाषया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

गर्जति, वदति , कायति, चलति , बकः

३. स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭ ମିଳାଅ)

| क | ख |
|---|---|
| टिङ् टिङ् | बकः |
| घँ घँ | काकः |
| का का | व्याघ्रः |
| आ आ | यानम् |
| गँ गँ | घण्टानादः |

# बालकाः आयात



बालकाः आयात बालकाः आयात
बालकाः आयात सधीरम् ।
पंक्तिं कुरुत पंक्तिं कुरुत
पंक्तिं कुरुत सत्वरम् ।।





मण्डलं कुरुत मण्डलं कुरुत
मण्डलं कुरुत सधीरम् ।
उपरि कूर्दत उपरि कूर्दत
उपरि कूर्दत सुन्दरम् ।।

अधः उपविशत अधः उपविशत
अधः उपविशत सधीरम् ।
गीतं गायत गीतं गायत
गीतं गायत सस्वरम् ।।





मौनं तिष्ठत मौनं तिष्ठत
मौनं तिष्ठत सधीरम् ।
मन्दं हसत मन्दं हसत
मन्दं हसत सादरम् ।।

**ଶବ୍ଦାର୍ଥ:-** **आयात-** ଆସ, **सधीरम्-** ଧୀରେ, **पंक्ति-** ଧାଡ଼ି, **मण्डलं-** ବୃତ୍ତାକାର, **उपरि-** ଉପରକୁ, **कूर्दत-** ଡିଅଁ, **अधः-** ତଳେ, **उपविशत-** ବସ, **मौनं-** ଚୁପ୍, **तिष्ठत-** ରୁହ, **मन्दम्-** ଧୀରେ, **हसत-** ହସ ।

**गीतं सस्वरं गायन्तु**

# अभ्यासः (ଅଭ୍ୟାସ)

१. शून्यस्थानं पूरयतु (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) मौनं ——— ।

ख) ——— गायत ।

ग) उपरि ———।

घ) बालकाः ———।

ङ) मण्डलं ———।

(गीतं, तिष्ठत, आयात, कूर्दत, कुरुत)

२. मातृभाषाया अर्थं लिखतु (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

मौनम्, अधः, उपरि, मन्दम्, सछीरम्

३. स्तम्भमेलनं करोतु। (ସ୍ତମ୍ଭ ମିଳାଅ)

| क | ख |
|---|---|
| बालकाः | कूर्दत |
| उपरि | हसत |
| गीतम् | गायत |
| मन्दं | आयात |
| मण्डलं | कुद्रत |

# सुभाषितानि ସୁଭାଷିତ

दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ।।

अर्थ : - एका वापी दशकूपैः समा भवति । एकः ह्रदः दशवापीभिः समः भवति ।
एकः पुत्रः दशह्रदैः समः भवति । किन्तु एकः वृक्षः दशपुत्रैः समः भवति ।

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः ।।

अर्थ : - उचिते काले वृष्टिः भवतु । भूमिः सस्यशालिनी भवतु । देशे क्षोभः (अस्थिरता) मा भवतु । सज्जनाः निर्भयाः भवन्तु ।

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।।

अर्थ : - पृथिव्यां जलम् अन्नं सुभाषितं च इति त्रीणि रत्नानि सन्ति । किन्तु मूढाः जनाः पाषाणखण्डान् एव रत्नानि मन्यन्ते ।

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ।।

अर्थ : - जीवनस्य प्रथमे भागे भवता विद्या न सम्पादिता । द्वितीये भागे धनं न सम्पादितम् । तृतीये भागे पुण्यं न सम्पादितम्, एवं चतुर्थे भागे किं वा करिष्यति ?

वृक्षः कल्पद्रुमः साक्षाद् जीवजगद्धिताय च ।
ददाति शीतलच्छायां जीवनमौषधं फलम् ।।

अर्थ : - वृक्षः प्रत्यक्षरूपेण कल्पतरुः भवति । सः जीवस्य संसारस्य च कल्याणकरः भवति । सः शीतलां छायां, पवनम्, औषधं, फलं च ददाति ।

# अभ्यासः (ଅଭ୍ୟାସ)

## १. शून्यस्थानं पूरयतु- (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) दशकूपसमा ............... ।

(ख) .............. वर्षतु पर्जन्यः ।

(ग) सज्जनाः ................. निर्भयाः ।

(घ) पृथिव्यां ............. रत्नानि ।

(ङ) चतुर्थे किं ............. ?

(करिष्यति, त्रीणि, सन्तु, काले, वापी)

## २. पादं पूरयतु - ପାଦପୂରଣ କର।

(क) वृक्षः कल्पद्रुमः साक्षात् जीवजगद्धिताय च ।

...... ......... ...... ...... ....... ........ .......... ।

(ख) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।

...... ......... ...... ...... ....... ........ .......... ।

(ग) काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।

...... ......... ...... ...... ....... ........ .......... ।

## ३. सस्वरं गायतु । ସ୍ୱରସହିତ ଗାନ କର ।

(क) दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ।।

(ख) वृक्षः कल्पद्रुमः साक्षाद् जीवजगद्धिताय च ।
ददाति शीतलच्छायां जीवनमौषधं फलम् ।।

(ग) प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ।।



# वदतु संस्कृतम् (ସଂସ୍କୃତ କୁହନ୍ତୁ)

| | |
|---|---|
| मम नाम..... | ମୋର ନାମ...... |
| भवत: नाम किम् ? | ଆପଣଙ୍କ ନାମ କ'ଣ ? |
| भवत्या: नाम किम् ? | ଆପଣଙ୍କ ନାମ କ'ଣ ? (ସ୍ତ୍ରୀଲିଙ୍ଗ) |
| आगच्छतु। उपविशतु। | ଆସନ୍ତୁ। ବସନ୍ତୁ। |
| किं सर्वं कुशलम् ? | କ'ଣ ସବୁ ଭଲ ତ ? |
| स्वास्थ्यं कथम् अस्ति ? | ଦେହ କିପରି ଅଛି ? |
| उत्तमम् अस्ति / नास्ति। | ଭଲ ଅଛି / ନାହିଁ |
| कृपया..... ददातु। | ଦୟା କରି .... ଦିଅନ୍ତୁ। |
| स्वीकरोतु। | ଗ୍ରହଣ କରନ୍ତୁ। |
| अहम् अल्पं संस्कृतं जानामि। | ମୁଁ ଅଳ୍ପ ସଂସ୍କୃତ ଜାଣେ |
| भयं मास्तु, धैर्येण वदतु। | ଭୟ କରନ୍ତୁ ନାହିଁ , ଧୈର୍ଯ୍ୟ ସହିତ କୁହନ୍ତୁ। |

# ପାଠ୍ୟ ଖସଡା

**୧. ଅର୍ଦ୍ଧବାର୍ଷିକ ବୋଧ ଆକଳନ ନିମନ୍ତେ :-**

ଗଦ୍ୟ : - ପ୍ରଥମ ପାଠରୁ - ଦ୍ୱାଦଶ ପାଠ ପର୍ଯ୍ୟନ୍ତ

ପଦ୍ୟ : ତ୍ରୟୋବିଂଶପାଠ - * ରକ୍ଷ ଗୋମାତରମ୍

* ଅହଂ ନମାମି

**୨. ବାର୍ଷିକ ବୋଧ ଆକଳନ ନିମନ୍ତେ :-**

ଗଦ୍ୟ : - ତ୍ରୟୋବିଂଶପାଠରୁ - ଦ୍ୱାବିଂଶ ପାଠ (ଅବ୍ୟୟ ପ୍ରୟୋଗ ପର୍ଯ୍ୟନ୍ତ)

ପଦ୍ୟ : ଚତୁର୍ବିଂଶପାଠ - * ଅକ୍ଷର ଗୀତମ୍

ସୁଭାଷିତାନି * ବାଳକାଃ ! ଆୟାତ

ପାଠ୍ୟ ପୁସ୍ତକ - ଭାଷାକାଳିକା ପ୍ରଥମୋଭାଗଃ

ଉତ୍ତରରେ ଦେବନାଗରୀ ଲିପି ବା ନିଜଲିପି ଉଭୟ ଗ୍ରହଣୀୟ ।